श्रीः

**APEX PON VIDYASHRAM - Velachery**
**Terminal Exam Worksheet ( 2017 -2018 )**
**SANSKRIT – X**

साधुवृत्तिं समाचरेत्

**Name :** ________ **Roll no. :** ________
**Class : X Section :** _____

## खण्डः क अपठितावबोधनम् –

काचित् बालिका आसीत्। एकदा सा क्रीडितुं मित्रैः सह उद्यानं प्रति गच्छति। उद्याने अनेके वानराः अपि आसन्। बालाः वानरान् दृष्ट्वा अतीव प्रसन्नाः भवन्ति। वानराः अपि बालान् दृष्ट्वा प्रसन्नाः भवन्ति। वानराः वृक्षस्य उपरि आसन्। बालाः वृक्षस्य अधः उपविशन्ति। वानराः अपि अधः आगत्य उपचिशन्ति। इदं दृष्ट्वा बालाः चकिताः भवन्ति। वानरैः सह च खेलितुम् इछन्ति। वानराः बालानाम् भावम् अवगच्छन्ति। ते बालानां समीपे आगत्य अनेक क्रिडाः कुर्वन्ति। सर्वे मिलित्वा आनन्देन क्रीडन्ति। प्रसन्नाः वानराः वृक्षान् आरुह्य बालानां कृते फलानि क्षिपन्ति। सर्वे मिलित्वा फलानि खादन्ति प्रसन्नाः च भवन्ति।

I. एकपदेन उत्तरत

i. बालिका क्रीडितुं कुत्र गच्छति वानाराः ?

ii. वानराः बालानां कृते कानि क्षिपन्ति ?

II. पूर्णवाक्येन उत्तरत

i. वानराः कान् दृष्ट्वा प्रसन्नाः भवन्ति ?

ii. सर्वे मिलित्वा किं खदन्ति ?

III. निर्देशानुसारं प्रदत्तविकम्पेभ्यः उचितं उत्तरं चित्वा लिखत

i. गद्यांशे क्षिपन्ति क्रियापदस्य कर्तुपदं किम् अस्ति ?

ii. एकदा सा क्रीडितुं मित्रैः सह उद्यानं प्रति गच्छति इति वाक्ये सा सर्वनामपदं कस्मै प्रयुक्तम् ?

iii. गद्यांशे सर्वे इति कर्तुपदस्य क्रियापदं किं प्रयुक्तम् ?

iv. अनुच्छेदे नीचैः इति अर्थे किं पदं प्रयुक्तम् ?

v. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

**<u>खण्डः ख –रचनात्मकलेखनम् –</u>**

1) **<u>पत्रम् पठित्वा मञ्जूषायाः साहाय्येन रिक्तस्थानम् पूरयत</u>**

---1---

---2--- स्वदेश

सप्रेम नमोनमः

तव पत्रेण ज्ञातं यत् त्वं ---3--- असि इति। अमेरिका देशे निवसन् अपि भवान् ---4--- भारतीयानां सङ्घटनां विधातुं कुतप्रयत्नोऽति इति विदित्वा मम ---5--- अतीव प्रसीदति। अधुना तु ये ---6--- विदेशं गच्छन्ति तेस्वदेशं विस्मरन्ति इति अतीव दुःखावहः। विदेशगतेषु जनेषु निजराष्ट्रहितं प्रति अभिरुचिः नित्यं वर्धेत इति लक्ष्यं दृष्ट्वा अतीव ---7--- जायते। आशासे यद् विदेशगतेषु जनेषु भारतीयसंस्काराणाम् न्यूनं न भवेत् इति भावनां भवान् दृढीकरिष्यति।

भवदीयं प्रियमित्रम्

---8---

मञ्जूषा

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| जनाः | प्रियमित्र | दिल्लीतः | तत्रस्थानां | कुशलः | सुरेशः | चेतः | सन्तोषः |

2) <u>मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखत।</u>



| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| हस्ते | महिलायाः | उपरि | उपनेत्रम् | पुरुषः | जनाः | मेलकम् | पृष्ठे | पश्यति | भ्रमणाय |

1.

2.

3.

4.

5.

**खण्डः ग अनुप्रयुक्तव्याकरणम् –**

**सन्धिं वा विच्छेदं कुरुत।**

1. लक्ष्मी + ईश्वरः =
2. विद्यालयः =
3. स्निग्ध + छायाम् =
4. सच्छास्त्राणाम् =
5. ममापि =

**समासं समासविग्रहं वा कुरुत।**

1. वृक्षपतितः =

2. पीताम्बरम् =

3. अनुपस्थिता =

4. सप्ताहे =

5. स्वर्गगतः =

6. नीरदः

**<u>प्रकृति प्रत्यय विभागानां प्रत्यान्तपदं लिखित।</u>**

1. हन् + तव्यत् =

2. इतिहास + ठक् =

3. केसरी =

4. हनुमान् =

5. कृ + अनीयर् =

**<u>अव्ययैः पूरयत।</u>**

1.सः रामः __________ गच्छति।

2.__________ रामः रावणम् अहनत्।

3.सः __________ वदति।

4.अभिमन्युः अपि अर्जुनः __________ वीरः आसीत्।

5.रात्रौ कुक्कुराः __________ धावन्ति।

| | | | | |
|---|---|---|---|---|
| इव | इतस्ततः | पुरा | एव | उच्चैः |

**<u>वाच्यानुसारं उत्तरं चित्वा लिखत।</u>**

1. __________ तत्र गम्यते। (अस्मद्)

2.__________ कविता श्रूयते। (युष्मद्)

3.अहम् यशस्वी __________। (भव्)

4.__________ नृपः दृश्यते। (अस्मद्)

5.बालिकाभिः मञ्चे __________ । (नृत्)

**<u>समयं संस्कृते लिखत।</u>**

3:15 =

8:30 =

11:45 =

2:00 =

## <u>खण्डः घ पठितावबोधनम —</u>

**अधोलिखितान् गद्याम्शान् पठित्वा प्रश्नान् उत्तरत –**

अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य - नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः। एकदा स दुष्टबुद्धिना सार्धम् कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थम् ग्रामान्तरम् प्रस्थितः।

अथ व्रजन्तौ तौ गर्तसम्कुले मार्गे क्रीडतः काम्श्चित् बालकान् प्रेक्ष्य अवदताम् - भो भो बालकाः ! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चिद् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरम् क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच - अयि भो ! यद्येवम् तर्हि कथम् भवन्तौ सुपथम् परित्यज्य अनेन कुपथेन गन्तुम् प्रवृतौ ? अपि इदम् श्रेयस्करम् ?

**1. एकपदेन उत्तरत-**

1. प्रच्छन्नभाग्यः कस्मिन् नगरे वसति स्म ?

2. सः केन सार्धम् ग्रामान्तरम् प्रस्थितः?

**2. पूर्णवाक्येन उत्तरत-**

1. बालकाः कीदृशे मार्गे क्रीडन्ति स्म ?

2. प्रच्छन्नभाग्यः  दुष्टबुद्धिः च बालकान् किमवदताम् ?

**3. भाषिककार्यम्-**

1. कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? अस्मिन् वाक्ये द्वे विशेषणपदे कस्मै पदाय प्रयुक्ते?

2. 'यदि कश्चित् गर्ते...... चिरम् क्लेशम् अनुभवेत् ' अस्मिन् वाक्ये 'अनुभवत्' क्रियायाः कर्तृपदम् किम्?

3. गद्याम्शे प्रयुक्तम् 'उद्दण्डः' इति पदस्य किम् विशेष्यपदम् ?

4. 'गृहे' अस्मिन् अर्थे किम् पर्यायपदम् गद्याम्शे प्रयुक्तम् ?

**अधोलिखितान् गद्याम्शान् पठित्वा प्रश्नान् उत्तरत –**

अनेन वचसा प्रतिहतान्तः करणः प्रच्छन्नभाग्यः अचिन्तयत् - किम् इदम् वचनम् विशेषेण माम् एव लक्ष्यीकरोति ? अहो ! कुमार्गम् आश्रितस्य मम कीदृशी इयम् क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्यप्रभृति पापपथम् त्यजामि इति विचिन्त्य मित्रम् दुष्टबुद्धिम् अवदत् 'सखे ! यदि माम् मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमम् पन्थानम् त्यजतु भवान्। '

दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखम् प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहम् प्रतिनिवृत्तः।

**1. एकपदेन उत्तरत-**

1. कस्य अन्तः करणम् प्रतिहतम् अभवत् ?

2. कः सद्वचनानि तिरस्कृतवान् ?

**2. पूर्णवाक्येन उत्तरत-**

1. प्रच्छन्नभाग्यः दुष्टबुद्धिम् किमकथयत् ?

2. बालवचः कीदृशम् आसीत् ?

**3. भाषिककार्यम्-**

1. गद्यम्शे 'मम' पदम् कस्मै प्रयुक्तम् ?

2. 'प्रच्छन्नभाग्यः' तु समुपजातविवेकः स्वगृहम् प्रतिनिवृत्तः' अस्मिन् वाक्ये प्रच्छन्नभाग्यस्य किम् विशेषणपदम् प्रयुक्तम्?

3. 'प्राचलत्' इति गद्याम्शे प्रयुक्तक्रियापदस्य किम् कर्तृपदम् ?

4. 'चिन्तयित्वा' अस्मिन् अर्थे किम् पर्यायपदम् गद्याम्शे प्रयुक्तम् ?

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

**क्रन्दनम् वर्धते तस्य, नान्तम् समधिगच्छति।**

**व्यसनम् प्राप्य यो मोहात् केवलम् परिदेवयेत्॥**

**1. एकपदेन उत्तरत-**

1. किम् प्राप्य मोहग्रस्तः नरः परिदेवयति ?

2. मोहग्रस्तस्य नरस्य किम् अन्तम् न गच्छति ?

**2. पूर्णवाक्येन उत्तरत-**

1. कस्य क्रन्दनम् अन्तम् न गच्छति ?

2. अयम् उपदेशः केन कस्मै दीयते ?

**3. भाषिककार्यम्-**

1. 'समधिगच्छति' क्रियायाः कर्तृपदम् किमस्ति ?

2. 'विलापम् कुर्यात्' अस्मिन् अर्थे किम् पदम् श्लोके प्रयुक्तम् ?

3. 'रागात्' अस्य पदस्य किम् विपरीतार्थकम् अत्र प्रयुक्तम् ?

4. 'वर्धते' इति क्रियापदस्य किम् कर्तृपदम् ?

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

**जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**

**स हेतुः सर्वविद्यानाम् धर्मस्य च धनस्य च॥**

**1. एकपदेन उत्तरत-**

1. जलबिन्दुनिपातेन किम् पूर्यते ?

2. कस्य क्रमशः निपतनेन घटः पूर्यते ?

**2. पूर्णवाक्येन उत्तरत-**

1. घटः क्रमशः पूर्यते एषः केषाम् हेतुः ?

**3. भाषिककार्यम्-**

1. 'पतनेन' अस्मिन् अर्थे किम् पदम् अत्र प्रयुक्तम् ?

2. 'पूर्यते' इति क्रियापदस्य किम् कर्तृपदम् ?

3. 'रिक्तम् भवति' इति अस्य किम् विपरीतार्थकम् क्रियापदम् पद्याम्शे प्रयुक्तम् ?

4. 'कलशः' इति पदस्य किम् पर्याय पदम् पद्याम्शे प्रयुक्तम् ?

**अधोलिखितान् गद्याम्शान् पठित्वा प्रश्नान् उत्तरत –**

एवम् बहुविधम् उपदेशम् श्रुत्वा शान्तचित्तः सः कस्यचित् कृषकस्य शस्यक्षेत्रे हलकार्यम् कर्तुम् प्रारभत, श्रमेण च शनैः शनैः प्रभूतम् धनम् अर्जितवान्। अथ पूर्वमित्रम् दुष्टबुद्धिः

प्रच्छान्नभाग्यस्य धनागमवृत्तान्तम् श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थम् सन्धि - खननसुयोगम् विलोकयन् स्थितः। तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीम् सम्बोध्य उवाच - अहो विचित्रः स्वप्नो मया दृष्टः। अस्माकम् क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति।

**1. एकपदेन उत्तरत-**

1. शान्तचित्तयः कः आसीत् ?

2. कः प्रच्छन्नभाग्यस्य गृहे मध्यरात्रे आगतः ?

**2. पूर्णवाक्येन उत्तरत-**

1. सम्भ्रान्तचित्तः प्रच्छन्नभाग्यः स्वपत्नीम् किम् उपच ?

2. प्रच्छन्नभाग्यः कथम् प्रभूतम् धनम् अर्जितवान् ?

**3. भाषिककार्यम्-**

1. 'पश्यन्' इत्यर्थे किम् क्रियापदम् गद्यांशे प्रयुक्तम् ?

2. अहो ! विचित्रः स्वप्नो मया दृष्टः - अत्र किम् विशेषणपदम् ?

3. 'विद्यते' इति पदस्य किम् कर्तृपदम् ?

4. 'तस्य एव गृहे' अत्र तस्य सर्वनामपदम् कस्मै प्रयुक्तम् ?

**अधोलिखितान् गद्यांशान् पठित्वा प्रश्नान् उत्तरत –**

तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत् - नाथ विरम अस्माद् लोभात्।

दुष्टबुद्धिः तु तयोः वार्ताम् श्रुत्वा झटिति एव क्षेत्रम् गतः। तत्र अश्वत्थमूलम् खनित्वा तम् सुवर्णकलशम् प्राप्तवान्। यदा स तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकम् विषधरम् फूत्कारम् कुर्वन्तम् पश्यति। भीतः स कलशम् पुनः आवृत्य तम् च आदाय मित्रस्य गृहम्

समागतः। स्वमित्रम् सर्पेण मारयितुम् इच्छन् सः भित्तौ प्रकल्प्य तन्मध्यतः कलशम् गृहाभ्यन्तरे क्षिप्तवान्।

**1. एकपदेन उत्तरत-**

1. प्रच्छान्नभाग्यस्य पत्नी कस्मिन् अनासक्ता ?

2. दुष्टबुद्धिः अश्वत्थतरुमूले किम् प्राप्तवान् ?

**2. पूर्णवाक्येन उत्तरत-**

1. दुष्टबुद्धिः कलशे किमपश्यत् ?

2. सः किमर्थम् कलशम् गृहाभ्यन्तरे अक्षिपत् ?

**3. भाषिककार्यम्-**

1. 'शीघ्रम्' इत्यर्थे किम् समानार्थकम् अव्ययपदम् गद्याम्शे प्रयुक्तम् ?

2. 'भीतः सः कलशम् पुनः .........' अत्र 'भीतः' पदम् कस्य विशेषनम् ?

3. 'पश्यति' इति क्रियापदस्य किम् कर्तृपदम् ?

4. 'तम् च आदाय' अत्र 'तम्' इति सर्वनामपदम् कस्मै प्रयुक्तम् ?

**अधोलिखितान् गद्याम्शान् पठित्वा प्रश्नान् उत्तरत –**

विचित्रा खलु दैवगतिः। पतितान् कलशाद् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिम् दष्टवान्। कलशपातशब्देन प्रबुद्धौ तौ दम्पती आश्चर्येण प्रचुरमणिमाणिक्यानाम् आभया भासमानम् निजगृहम् दृष्ट्वा परस्परम् अवलोकयन्तौ अतिष्ठताम् ।

अतः उच्यते - **पापिनाञ्च सदा दुःखम्, सुखम् वै पुण्यकर्मणाम्।**

**एवम् स्थिरतरम् ज्ञात्वा साधुवृत्तिम् समाचरेत् ॥**

**1. एकपदेन उत्तरत-**

1. सदैव किम् समाचरेत् ?

2. दैवगतिः कीदृशी भवति ?

**2. पूर्णवाक्येन उत्तरत-**

1. कलशे पतिते किम् अभवत् ?

2. केषाम् सदा दुःखम् भवति केषाम् च सदा सुखम् ?

**3. भाषिककार्यम्-**

1. 'मिथः इति अस्मिन् अर्थे किम् पर्यायपदम् गद्याम्शे प्रयुक्तः ?

2. 'अतिष्ठताम्' क्रियापदस्य कर्तृपदम् किम् ?

**अधोलिखितान् गद्याम्शान् पठित्वा प्रश्नान् उत्तरत –**

गृहे तस्य भार्या सपदि समागतम् पतिम् दृष्ट्वा अपृच्छत् – आर्य ! किम् सर्वगतम् कुशलम् वर्तते ? अयथाकालम् समागतोऽसि ? सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वम् वृत्तान्तम् विवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत् - अलम् चिन्तया। आपदाम् तरणिः धैर्यम्। इदानीम् विषादम् त्यक्त्वा उद्यमः क्रियताम्।

**1. एकपदेन उत्तरत-**

1. धर्ममतिः कः अभवत् ?

2. प्रच्छन्नभाग्यस्य भार्या कीदृशी आसीत् ?

**2. पूर्णवाक्येन उत्तरत-**

1. गृहमागत्य प्रच्छन्नभाग्यः भार्यायै किम् न्यवेदयत् ?

2. बुद्धिमती पत्नी किम् अवदत् ?

**3. भाषिककार्यम्-**

1. 'इदानीम्' इत्यर्थे प्रयुक्तम् अव्ययपदम् गद्यांशात् चित्वा लिखत।

2. 'आपदाम् तरणिः धैर्यम्' अत्र 'तरणिः' पदस्य कः अर्थः अस्ति ?

3. 'अक्रन्दत्' इति पदस्य किम् कर्तृपदम् ?

4. 'तस्य भार्या' अत्र तस्य सर्वनामपदम् कस्मै प्रयुक्तम् ?

**अधोलिखितस्य श्लोकस्य अन्वयम् मञ्जूषातः पदानि चित्वा उचितपदक्रमेण पूरयत –**

**1. क्रन्दनम् वर्धते तस्य, नान्तम् समधिगच्छति।**

**व्यसनम् प्राप्य यो मोहात् केवलम् परिदेवयेत्॥**

**अन्वयः** - यः (i) ______________ प्राप्य (ii) _____________ केवलम् परिदेवयेत् तस्य (iii) _________ वर्धते, (iv) __________ (च) न समधिगच्छति।

**2. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।**

**स हेतुः सर्वविद्यानाम् धर्मस्य च धनस्य च॥**

**अन्वयः** – (यथा) जलबिन्दुनिपातेन (i) __________ घटः (ii) ___________ (तथैव) सर्वविद्यानाम् (iii) ________ (iv) __________ सः एव हेतुः।

**3. अतः उच्यते -**

**पापिनाञ्च सदा दुःखम्, सुखम् वै पुण्यकर्मणाम्।**

**एवम् स्थिरतरम् ज्ञात्वा साधुवृत्तिम् समाचरेत् ॥**

**अन्वयः** – सदा (i) ______________ दुःखम् पुण्यकर्मणाम् च वै (ii) _________एवम् (iii) ____________ ज्ञात्वा (iv) _________ समाचरेत्।

मञ्जूषा

| |
|---|
| साधुवृत्तिम्, व्यसनम्, मोहात्, पापिनाम्, क्रमशः, क्रन्दनम्, सुखम्, धर्मस्य, पूर्यते, अन्तम्, धनस्य, |

**<u>शब्दार्थमेलनं कुरुत।</u>**

| | | | |
|---|---|---|---|
| 1. | अमात्यः | - | कथितम् |
| 2. | विषण्णाः | - | कृपणता |
| 3. | आर्तानाम् | - | मन्त्री |
| 4. | उक्तम् | - | दुःखिताः |
| 5. | कामये | - | पीडितानाम् |
| 6. | कार्पण्यः | - | न्यूनाम् |
| 7. | विरलाम् | - | इच्छामि |

**<u>प्रश्ननिर्माणं कुरुत।</u>**

1. **<u>विषादं</u>** त्यक्त्वा उद्यमः क्रियताम्।
2. **<u>जलबिन्दुनिपातेन</u>** क्रमशः घटः पूर्यते।
3. कृषकस्य क्षेत्रे **<u>श्रमं</u>** कृत्वा स धनम् अर्जितवान्।
4. धैर्यम् **<u>आपदां</u>** तरणिः।
5. नरः **<u>साधुवृत्तिं</u>** समाचरेत्।
6. प्रच्छन्नभाग्यस्य गृहम् **<u>मणीनाम्</u>** आभया भासमानम् अभवत्।

श्रीः

**APEX PON VIDYASHRAM - Velachery**
**Terminal Exam Worksheet ( 2017 -2018 )**
**SANSKRIT – X**

अभ्यासवशगं मनः

**Name : ________** **Roll no. : ________**
**Class : X Section : _____**

## खण्डः क अपठितावबोधनम् –

## अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रशनान् संस्कृतेन उत्तरत

मानवजिवने छात्रजिवनं प्रशस्ततरं अस्ति। अस्मिन् एव जीवने नरः भाविजीवनस्य निर्माणं करोति। इदं जीवनं चिन्ताशून्यं आनन्दप्रदञ्च वदन्ति वृध्दाः। सिध्दान्तरूपेण आजन्मनः पञ्चविम्शतिवर्षाणि यावत् छात्रजिवनं प्रसरति इति स्वीक्रियते बुधैः। अध्ययनकाले विद्यार्थी सततं महापुरुषैः सह सम्वदति। सः महाकवीनां काव्यरस पीत्वा स्वात्मानं पवित्रीकरोति। ये छात्रजीवने सदाचारं पालयन्ति ते एव भाविजीवने सफलाः भवन्ति। अतः सर्वथा अभिनन्दनीयम् इदं जीवनम्।

I. एकपदेन उत्तरत

1. विद्यार्थी केषां काव्यरसं पीत्वा स्वात्मानं पवित्री करोति ?
2. मानवजीवने किं जीवनं प्रशस्ततरं अस्ति ?

II. पूर्णवाक्येन उत्तरत

1. अध्ययनकाले विद्यार्थी किं करोति ?

2. कति वर्षाणि छात्रजीवनं प्रसरति ?

III. <u>निर्देशानुसारं प्रदत्तविकम्पेभ्यः उचितं उत्तरं चित्वा लिखत</u>

1. 'वदन्ति' इति क्रियापदस्य कर्तपदं किं ?

2. 'चिन्ताशून्यम्' इति विशेषणपदस्य विशेष्यपदं किं प्रयुक्तम् ?

3. 'आमरणम्' इति पदस्य विपरीतपदम् अनुच्छेदे किं प्रयुक्तम् ?

4. 'निरन्तरम्' इति पदस्य पर्यायपदम् अनुच्छेदे किं प्रयुक्तम् ?

5. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

## खण्डः ख –रचनात्मकलेखनम् –

I. <u>भवान् नवीनः। स्व विद्यालयस्य वार्षिकोत्सवम् अधिकृत्य मित्रं सुरेशं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयतु -</u>

प्रियमित्र ---------- (1)

सप्रेम नमस्ते।

----------- (2) तव पत्रं प्राप्तम् । समाचारोऽयं यत् गतसप्ताहे ---------- (3) वार्षिकोत्सवः सम्पन्नः। सर्वे छात्राः अध्यापकाश्च व्यस्ताः आसन्। शिक्षानिदेशकः कार्यक्रमस्य ---------- (4) आसीत्। सः अस्माकम् ----------- (5) प्राशंसत्। सः योग्येभ्यः छात्रेभ्यः ----------- (6) अयच्छत्। पितृभ्यां मम ----------- (7) निवेदनीयाः।

भवदीय मित्रम्

----------- (8)

मञ्जूषा

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| विद्यालयस्य | नवीन | अद्य | प्रणामाः | सुरेशः | मुख्यातिथिः | कार्यक्रमम् | पारितोषिकानि |

II. <u>मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा चत्वारि वाक्यानि संस्कृतेन लिखत।</u>



मञ्जूषा

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| हस्ते | महिलायाः | उपरि | उपनेत्रम् | पुरुषः | जनाः | मेलकम् | पृष्ठे | पश्यति | भ्रमणाय |

1.

2.

3.

4.

5.

**खण्डः ग अनुप्रयुक्तव्याकरणम् –**

**सन्धिं वा विच्छेदं कुरुत।**

1. गम् + गा =
2. स्वच्छत्रं =
3. सूर्योदयः =
4. साधु + गच्छति =
5. महौषधिः =

**समासं समासविग्रहं वा कुरुत।**

1. शताब्दी =
2. जलदाः =
3. अहिंसा =

4. सुन्दरनारी =

5. गृहगतः =

6. संस्कृते प्रवीणः

**<u>प्रकृति प्रत्यय विभागानां प्रत्यान्तपदं लिखित।</u>**

1. करणीयः =

2. तपस्विनी =

3. गम् + तव्यत् =

4. बल + मतुप् =

5. दैहिकं =

**<u>अव्ययैः पूरयत।</u>**

1. __________ विद्धीत न क्रियाम्।

2.धर्मं __________ जीवनं शून्यम्।

3. __________ वद उच्चैः मा वद।

4. सा __________ लेखं लिखति।

5.मूर्च्छितः दशरथः __________ कैकेयीम् अवदत।

| | | | | |
|---|---|---|---|---|
| सहसा | अधुना | शनैः | सहसा | विना |

**<u>वाच्यानुसारं उत्तरं चित्वा लिखत।</u>**

1. परोपकारी __________ करोति।

2.आचार्यैः __________ पाठ्यन्ते।

3.छात्रैः __________।

4.गुरुः विद्याधनं __________।

5.छात्रैः उच्चैः __________।

| | | | | |
|---|---|---|---|---|
| ददाति | छात्राः | उद्यते | परोपकारम् | हस्यते |

**<u>समयं संस्कृते लिखत ।</u>**

5:15 =

6:30 =

9:45 =

6:00 =

**<u>खण्डः घ पठितावबोधनम —</u>**

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

**अर्जुनः उवाच्**

अथ केन प्रयुक्तोऽयम् पापम् चरतिपुरुषः ।

अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजितः ॥

**1. एकपदेन उत्तरत-**

1. अत्र 'वार्ष्णेय' सम्बोधनम् कस्यकृते प्रयुक्तम् ?

2. कः पापम् चरति ?

**2. पूर्णवाक्येन उत्तरत-**

अनिच्छन्नपि पुरुषः किम् करोति ?

**3. भाषिककार्यम्-**

1. 'न इच्छन् अपि' अस्मिन् स्थाने किम् पदम् श्लोके प्रयुक्तम् ?

2. श्लोके 'अयम्' पदम् कस्य विशेषणम् ?

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

**कृष्ण उवाच**

काम एष क्रोध एष रजोजुणसमुद्भवः।

महाशनो महापाप्मा विद्धेनमिह वैरिणम्॥

**1. एकपदेन उत्तरत-**

1. कः वैरी अस्ति ?

2. क्रोधः कस्मात् गुणात् समुद्भवति ?

**2. पूर्णवाक्येन उत्तरत-**

'कामाय' कानि विशेषणानि श्लोके प्रयुक्तानि ?

**3. भाषिककार्यम्-**

1. 'इन्' प्रत्ययान्तम् पदम् श्लोकात् चित्वा लिखत।

2. 'अस्मिन् लोके' इत्यर्थे किम् अव्ययपदम् श्लोके प्रयुक्तम् ?

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

शक्नोतीहैव यः सोढुम् प्राक् शरीरविमोक्षणात्।

कामक्रोधोद्भवम् वेगम्, स युक्तः स सुखी नरः॥

**1. एकपदेन उत्तरत-**

1. कः नरः सुखी ?

2. मनुष्यः कस्मात् पूर्वम् एव क्रोधोद्भव वेगम् सोढुम् शक्यते ?

**2. पूर्णवाक्येन उत्तरत-**

किम् कृत्वा नरः सुखी भवति ?

**3. भाषिककार्यम्-**

1. 'पूर्वम्' इत्यर्थे श्लोके किम् पदम् प्रयुक्तम् ?

2. तुमुन् प्रत्ययान्तम् पदम् श्लोकात् चित्वा लिखत ।

3. 'योगी' इत्यर्थे किम् पदम् श्लोके प्रयुक्तम् ?

4. 'शक्नोतीहैव' अत्र सन्धिच्छेदः कर्तव्यः।

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।

स्मृतिभ्रम्शाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥

**1. एकपदेन उत्तरत-**

1. बुद्धेः नाशः कस्मात् भवति ?

2. क्रोधात् कः भवति ?

**2. पूर्णवाक्येन उत्तरत-**

बुद्धिनाशात् किम् भवति ?

**3. भाषिककार्यम्-**

1. 'स्मृतिविभ्रमः' इत्यस्य स्थाने किम् पदम् श्लोके प्रयुक्तम् ?

2. ________________________________________स्मृतेः विभ्रमः भवति।'

रिक्तस्थानपूर्तिम् कुरुत।

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ !

पाप्मानम् प्रजहि हयेनम् ज्ञानविज्ञाननाशनम्॥

**1. एकपदेन उत्तरत-**

1. कः ज्ञानविज्ञाननाशकः ?

2. 'भरतर्षभ' सम्बोधनपदम् कस्मै प्रयोक्तम् ?

**2. पूर्णवाक्येन उत्तरत-**

आदौ एव कानि वशीकरणीयानि

**3. भाषिककार्यम्-**

1. 'प्रजहि' क्रियापदस्य कर्तृपदम् किम् ?

2. 'पाप्मानम्' इति पदम् कस्य पदस्य विशेषणम् ?

3. 'प्रारम्भे' इत्यस्मिन् अर्थे किम् पदम् श्लोके प्रयुक्तम् ?

4. 'हयेनम्' पदे सन्धिच्छेदः कर्तव्यः।

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत –**

अर्जुन उवाच

चञ्चलम् हि मनः कृष्ण ! प्रमाथि बलवद्दृढम्।

तस्याहम् निग्रहम् मन्ये वायोरिव सुदुष्करम्॥

**1. एकपदेन उत्तरत-**

1. मनः कीदृशम् भवति ?

2. मनसः निग्रहम् कथम् सुदुष्करम् ?

**2. पूर्णवाक्येन उत्तरत-**

वायोरिव किम् कठिनम् भवति ?

**3. भाषिककार्यम्-**

1. ‘अहम्’ इति पदम् कस्मै प्रयुक्तम् ?

2. ‘मन्ये’ क्रियायाः कर्तृपदम् किमस्ति ?

3. ‘सरलम्’ अस्य पदस्य विलोमपदम् किमस्ति ?

4. ‘स्थिरम्’ इति पदस्य विलोमपदम् चित्वा लिखित।

**अधोलिखितेषु श्लोकेषु अन्वयम् अचित पदक्रमेण पूरयत।**

**1. अर्जुनः उवाच्**

**अथ केन प्रयुक्तोऽयम् पापम् चरतिपुरुषः ,**

**अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजितः ॥**

**अन्वयः** - वार्ष्णेय ! अथ केन (i)____________ अयम् पूरुषः (ii) _______________

अपि बलात् (iii) ____________ इव (iv) ___________ चरति।

**2. श्रीकृष्ण उवाच**

**काम एष क्रोध एष रजोजुणसमुद्भवः।**

**महाशनो महापाप्मा विध्येनमिह वैरिणम्॥**

**अन्वयः** – रजोजुणसमुद्भवः (i)______________ कामः एषः (ii) _________________

महाशनः महापाप्मा । एनम् (iii) _____________ (iv)________________ विद्धि।

**3. शक्नोतीहैव यः सोढुम् प्राक् शरीर विमोक्षणात्।**

**कामक्रोधोद्भवम् वेगम्, स युक्तः स सुखी नरः॥**

**अन्वयः** – शरीरविमोक्षणात् (i)______________ कामक्रोधोद्भवम् (ii) ____________

इह एव (iii) ____________ शक्नोति सः नरः (iv)_______________ सः

सुखी (भवति) ।

**4. ध्यायतः विषयान् पुम्सः सम्गस्तेषूपजायते।**

**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥**

**अन्वयः** - विषयान् (i)________________, पुम्सः तेषु (ii) ______________ उपजायते। सङ्गात् (iii) ______________ सञ्जायते (iv)___________ क्रोधः अभिजायते।

**5. क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।**

**स्मृतिभ्रम्शाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥**

**अन्वयः** - क्रोधात् (i)____________ सम्मोहात् (ii) _____________ स्मृतिभ्रम्शात् (iii) ______________ भवति बुद्धिनाशात् (iv)_________ ।

**6. तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ !**

**पाप्मानम् प्रजहि हयेनम् ज्ञानविज्ञाननाशनम्॥**

**अन्वयः** - भरतर्षभ ! तस्मात् त्वम् (i)_____________ इन्द्रियाणि नियम्य (ii) ___________ एनम् (iii) _____________ हि (iv)___________ ।

**7. चञ्चलम् हि मनः कृष्ण ! प्रमाथि बलवद्दृढम्।**

**तस्याहम् निग्रहम् मन्ये वायोरिव सुदुष्करम्॥**

**अन्वयः** - कृष्ण! (i)____________ हि सञ्चलम् (ii) _____________ बलवद्दृढम्। (iii) _____________ निग्रहम् वायोः इव (iv)___________ मन्ये।

**8. श्रीकृष्ण उवाच**

**असम्शयम् महाबाहो ! मनो दुर्निग्रहम् चलम्।**

**अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते॥**

**अन्वयः** - महाबाहो ! (i)____________ असम्शयम् (ii) ____________ दुर्निग्रहम् चलम्, (एतत्) तु । (iii) ____________ वैराग्येण च (iv)___________ ।

**अधोलिखितम् श्लोकम् पठित्वा प्रश्नान् उत्तरयत -**

ध्यायतः विषयान् पुम्सः सम्गस्तेषूपजायते।

सङ्गात्सञ्जायते कामः कामात्क्रोदोऽभिजायते॥

**1. एकपदेन उत्तरत-**

1. कस्मात् कामः जायते ?

2. कामात् कः अभिजायते ?

**2. पूर्णवाक्येन उत्तरत-**

यदा मनुष्यः विषयान् ध्यायति तदा तस्य किम् भवति ?

**3. भाषिककार्यम्-**

1. 'पुम्सः' इति शब्दस्य विशेषणम् किम् अस्ति ?

2. 'अभिजायते' क्रियायाः कर्तृपदम् किम् ?

**अधोलिखितम् सम्वादम् पठित्वा प्रश्नान् उत्तरयत -**

रविः - सम्गीते ! अयम् अस्माकम् विद्यालयस्य पुस्तकालयः।

सम्गीता - अहो ! अत्र तु ग्रन्थचक्रिका अपि अस्ति ।

रविः - आम् ! अस्याम् ग्रन्थचक्रिकायाम् अनेके सम्स्कृतग्रन्थाः स्थापिताः।

सम्गीता - (पठित्वा) वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि। कथमत्र गीता तु न दृश्यते।

रविः - अयि ! गीता तु महाभारतस्य एव अम्शः।

सम्गीता - महाभारते तु कौरवपाण्डवानाम् युद्धम् वर्णितम् ।

रविः - मुग्धे ! किम् न जानासि तस्मिन् एव युद्धकाले श्रीकृष्णः मोहग्रस्तम् अर्जुनम् यत् उपदिशत् तदेव गीतायाम् निबद्धम्।

सम्गीता - आम् ! स्मरामि ! परम् कस्तावत् उपदेशः ?

रविः - तस्य उपदेशस्यैव एकम् अम्शम् अद्य वयम् पठामः किल। शीर्षकस्तु – 'अभ्यासवशगम् मनः'।

सम्गीता - कोऽर्थः अस्य शीर्षकस्य ?

रविः - मनः चञ्चलम् परम् अभ्यासेन वम्शम् गच्छति।

**1. एकपदेन उत्तरत-**

1. महाभारते केषाम् युद्धम् वर्णितम् ?

2. गीता कस्य अम्शः ?

**2. पूर्णवाक्येन उत्तरत-**

1. गीतायाम् किम् निबद्धम् अस्ति ?

2. पाठस्य शीर्षकस्य कः अर्थः ?

**3. भाषिककार्यम्-**

1. 'मनः' शब्दस्य किम् विशेषणम् अत्र प्रयुक्तम् ?

2. 'मोहग्रस्तम् अर्जुनम्' अनयोः पदयोः किम् विशेष्यपदम् ?

**<u>प्रश्ननिर्माणं कुरुत ।</u>**

1.कामः एव **<u>क्रोधं</u>** जनयति ।

2.कामः एव **<u>अस्माकं</u>** शत्रुः ।

3.तेषु **<u>क्रोधः</u>** उपजायते ।

4.तेषु **<u>संगः</u>** उपजायते।

5.**<u>मनः</u>** चञ्चलम् अस्ति।

6.मनः अभ्यासेन **<u>वशं</u>** गच्छति।

7.मनः दुर्निग्रहं **<u>चलम्</u>** चास्ति।

8.**<u>मनसः</u>** निग्रहः वायोः इव कठिनः

9.**<u>कामः</u>** ज्ञानस्य विज्ञानस्य च नशां करोति।

**<u>शब्दार्थमेलनं कुरुत।</u>**

| | | | |
|---|---|---|---|
| 1. | वायु | - | अर्जुन |
| 2. | भरतर्षभ | - | वासुदेवः |
| 3. | दुष्करम् | - | पश्चात् |
| 4. | कृष्णः | - | सर्वप्रथमम् |
| 5. | पुंसः | - | पवन |
| 6. | प्राक् | - | कठिनम् |
| 7. | वैरि | - | शत्रुः |
| 8. | आदौ | - | मनुष्यः |

श्रीः

**APEX PON VIDYASHRAM - Velachery**
**Terminal Exam Worksheet ( 2017 -2018 )**
**SANSKRIT – X**

नास्ति त्यागसमम् सुखम्

**Name : ________** **Roll no. : ________**
**Class : X Section : _____**

---

## खण्डः क अपठितावबोधनम् –

**अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रशनान् संस्कृतेन उत्तरत**

अस्मिन् संसारे सज्जनाः दुर्जनाः च इति द्विविधाः जनाः वसन्ति। सज्जनाः स्वाचरणेन सर्वान् जनान् प्रीणयन्ति। दुर्जनाः स्वव्यवहारेण जनान् पीडयन्ति। सत्पुरुषाः सदा प्रियं वदन्ति सत्यं वदन्ति सर्वेषां उपकारं च कुर्वन्ति। सत्पुरुषाः हंस तुल्याः भवन्ति यथा हंसः संसारे दुग्धं गह्णानि जलं च त्यजति तथैव सज्जनाः अपि गुणान् गहीत्वा दुर्गुणान् परित्यजन्ति। सत्पुरुषाणां हृदयेषु सर्वान् प्रति स्नेहः दया सहानुभूतिः सहयोगभावः च भवति। सज्जनाः अकारणम् एव कस्मै अपि न क्रुध्यन्ति ते कस्यापि किमपि न हरन्ति। ते सर्वदा लोककल्याणाय प्राणिहिताय च चिन्तयन्ति। दुर्जनाः तु सर्वत्र विपरीतम् आचरन्ति। अस्माकं शास्त्रेषु सज्जनानां प्रशंसा दुष्टानां च निन्दा कृता। वयं सदा सज्जनानां मार्गम् अनुसरणं कुर्याम।

I. एकपदेन उत्तरत

1. स्वाचरणेन जनान् के प्रीणयन्ति ?

2. संसारे कति विधाः जनाः वसन्ति ?

II. पूर्णवाक्येन उत्तरत

1. सत्पुरुषाः हंसतुल्याः कथं भवन्ति ?

2. वयं किम् अनुसरणं कुर्याम ?

III. <u>निर्देशानुसारं प्रदत्तविकम्पेभ्यः उचितं उत्तरं चित्वा लिखत</u>

1. 'चिन्तयन्ति' इति क्रियापदस्य कर्तपदं किं ?

2. 'सर्वान्' इति पदस्य विशेष्यपदं किं प्रयुक्तम् ?

3. 'प्रशंसा' इति पदस्य विपरीतपदम् अनुच्छेदे किं प्रयुक्तम् ?

4. 'प्रसन्नं कुर्वन्ति' इति पदस्य पर्यायपदम् अनुच्छेदे किं प्रयुक्तम् ?

IV. <u>अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।</u>

## <u>खण्डः ख –रचनात्मकलेखनम् –</u>

I. भवान् सुधांशुशेखरः। भवतः मित्रं दिवाकरः छात्रावासे निवसति। पर्वतयात्रानिमंत्रण विषयकं मित्रं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।

वसन्त विहारम्

दिल्लीतः

प्रिय मित्र दिवाकर

सप्रेम --------- (1)

अत्र कुशलं तत्रास्तु। सितम्बरमासस्य पञ्चदशतिथौ -------- (2) परीक्षा समाप्ता भविष्यति। तदनन्तरम् सितम्बरमासस्य विंशतिदिनाङ्कात् -------- (3) पञ्चविंशतिदिनांकं यावत् पञ्चदिनपरिमितम्। --------- (4) अस्माकं मित्रैः आयोजितम्। अयं शिक्षाप्रदः कार्यक्रमः अतीव रुचिकरः आनन्ददायकः भविष्यति। अस्मिन् अवसरे वयं सर्वे --------- (5) अपि कामयामहे। आशासे भवान् अस्य प्रस्तावस्य अनुमोदनम् अवश्यमेव

करिष्यति। --------- (6) अतीव उत्सुकतया भवदीयस्य पत्रस्य --------- (7) करिष्यामि।

भवदीय मित्रम्

--------- (8)

मञ्जूषा

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अहम् | प्रतीक्षाम् | आरभ्य | नमस्ते | पर्वतीयभ्रमणम् | शिक्षाप्रदः | भवदीय संगतिम् | सुधांशुशेखरः |

II. <u>मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि संस्कृतेन लिखत।</u>



मञ्जूषा

| | | | | |
|---|---|---|---|---|
| छात्राः | लेखनी | हस्ते | परीक्षाकक्षे | वस्त्राणि |
| ध्यानेन | लिखन्ति | अधः | पत्राणि | बालाः |

1.

2.

3.

4.

5.

## खण्डः ग अनुप्रयुक्तव्याकरणम् –

**सन्धिं वा विच्छेदं कुरुत।**

1. सन्धिच्छेदः =
2. सदाचारः =
3. पितुर्वचनम् =
4. तथा + एव =
5. यथोचितं =

**समासं समासविग्रहं वा कुरुत।**

1. पञ्चवटी =
2. रामहतः =
3. अप्रियः =
4. कुम्भं करोति इति =
5. विविधैः भोज्यपदार्थैः =
6. मोहेन ग्रस्तः

**प्रकृति प्रत्यय विभागानां प्रत्यान्तपदं लिखित।**

1. स्मृ + अनीयर् =
2. प्रमादी =
3. पौराणिकी =
4. कृ + तव्यत् =
5. मतिमान् =

**अव्ययैः पूरयत।**

1.__________ एषः छात्रः अस्ति।

2.तौ __________ मा भ्रमताम्।

3.त्वम् __________ अधुना आगच्छ तथा।

4.__________ पठनाय उपविश।

5.__________ अयोध्यायां दशरथः नृपः बभूव।

| | | | | |
|---|---|---|---|---|
| पुरा | नूनम् | अत्र | इतस्ततः | तत्र |

**<u>वाच्यानुसारं उत्तरं चित्वा लिखत।</u>**

1.__________ पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

2.सर्वैः __________ श्रुयते।

3.शिष्यैः गुरुः __________।

4.जनैः व्यायामः __________।

5.छात्राः पठनाय अधुना __________।

| | | | | |
|---|---|---|---|---|
| क्रियते | मूढैः | नम्यते | उपविशन्ति | कथा |

**<u>समयं संस्कृते लिखत।</u>**

10:15 =

8:30 =

12:45 =

2:00 =

**<u>खण्डः घ पठितावबोधनम —</u>**

**अधोलिखितान् गद्यांशं पठित्वा तदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत –**

1.अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनाम् राजा बभुव। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्।जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्।तत्र अर्थिनाम् समूहः अन्न-पान-वसन-रजत-

सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्।राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तम् देशम् आयान्ति स्म।

**1. एकपदेन उत्तरत-**

1. राजा काः पुत्रवत् पालयति स्म ?

2. कः शिवीनाम् राजा अभवत् ?

**2. पूर्णवाक्येन उत्तरत-**

1. बोधिसत्त्वः बाल्यकालात् एव कीदृशः आसीत् ?

2. अर्थिनाम् समूहः किम् किम् लब्ध्वा सन्तुष्टः भवति स्म ?

**3. भाषिककार्यम्-**

1. 'अभीष्टानि वस्तूनि' अनयोः पदयोः किम् विशेष्यपदम् ?

2. 'अयम्' इत्यस्य पदस्य स्थाने किम् पदम् अनुच्छेदे प्रयुक्तम् ?

**अधोलिखितान् गद्यांशं पठित्वा तदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत –**

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनाम् विरलसम्ख्याम् विलोक्य चिन्तयत् मम अर्थिनः तु धनलाभमत्रेण सन्तोषम् भजन्ते। नूनम् ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते। एवम् राज्ञः स्वेषु गात्रेष्वपि निरासक्तिम् विज्ञाय सकलम् ब्रह्माण्डम् व्याकुलम् सञ्जातम्।

**1. एकपदेन उत्तरत-**

1. केषाम् विरलसम्ख्याम् दृष्ट्वा राजा चिम्तितः आसीत् ?

2. कुत्र विचरन् राजा अचिन्तयत् ?

**2. पूर्णवाक्येन उत्तरत-**

1. किम् विज्ञाय सकलम् ब्रह्माण्डम् व्याकुलम् सञ्जातम् ?

**3. भाषिककार्यम्-**

1. 'सन्तुष्टानाम् अर्थिनाम्' अनयोः पदयोः किम् विशेषणपदम् ?

2. रिक्तस्थानपूर्तिम् कुरुत-

ते दानवीराः ______________________________यान् याचकाः शरीरस्य

______________________________अपि याचन्ते।

3. 'मम अर्थिनः तु धनलाभमत्रेण सन्तोषम् भजन्ते' अत्र 'भजन्ते' क्रियापदस्य कर्तृपदम् किमस्ति ?

4. 'समस्तम् / सम्पूर्णम्' अस्मिन् अर्थे किम् अव्ययपदम् अस्मिन् गद्याम्शे प्रयुक्तम् ?

**अधोलिखितान् गद्यांशं पठित्वा तदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत –**

राजा एवम् विचारयति सति तस्य दानशीलताम् परीक्षितुम् देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपम् धारयित्वा तत्पुरतः अवदत्- हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितम् जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः।

**1. एकपदेन उत्तरत-**

1. कः नेत्रहीनयाचकः अभवत् ?

2. कस्य दानशीलताम् परीक्षितुम् सः नेत्रहीनयाचकस्य रूपम् अधारयत् ?

**2. पूर्णवाक्येन उत्तरत-**

नेत्रहीनयाचकः राजानम् प्रति किमवदत् ?

**3. भाषिककार्यम्-**

1. गद्याम्शे 'आशान्वितः' विशेषणपदम् कस्मै प्रयुक्तम् ?

2. 'समक्षम्' इत्यर्थे किम् पदम् गद्याम्शे प्रयुक्तम् ?

3. ‘रवि-शशि-तारा-मण्डलभूषितम्’ एतत् समस्तपदम् कस्य पदस्य विशेषणम्? गद्यांशात् चित्वा लिखत।

4. ‘भवतः दानवीरताम् आकर्ण्य.......... अस्मिन् वाक्ये ‘भवतः’ पदम् कस्मै प्रयुक्तम् ?

**अधोलिखितान् गद्यांशं पठित्वा तदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत –**

4. राजा उवाच- भगवन् ! भवन्मनोरथम् पूरयित्वा आत्मानम् अनुगृहीतम् कर्तुम् इच्छामि। आदिश्यताम्, किम् करवाणि? विप्रः उवाच- यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्, “लोके चक्षुर्दानम् दुष्करमेव। नूनम् ईदृशम् दानम् इच्छन् अयम् याचकः केनापि प्रेरितः स्यात् ! अथवा भवतु नाम। किम् बहु चिन्तनेन।” इति विचार्य राजा अभाषत-भो मित्र ! किमेकेन चक्षुषा, अहम् भवते चक्षुर्द्वयमेव प्रयच्छामि इति।

राज्ञः नेत्रदानार्थम् निश्चयम् ज्ञात्वा अमात्याः विषण्णाः भूत्वा अवदन्-महाराज ! अलम् एतावता दुस्साहसेन, प्रभूतम् धनमेव दीयताम् ।

**1. एकपदेन उत्तरत-**

1. लोके किम् दुष्करम् ?

2. कः चक्षुर्द्वयम् दातुम् इच्छामि स्म ?

**2. पूर्णवाक्येन उत्तरत-**

राज्ञः नेत्रदानाय निश्चयम् ज्ञात्वा अमात्याः किमवदन् ?

**3. भाषिककार्यम्-**

1. ‘अमात्याः विषण्णाः भूत्वा अवदन्’ अस्मिन् वाक्ये किम् विशेषणपदम् ?

2. ‘प्रसन्नः’ इत्यर्थे किम् पदम् गद्यम्शे प्रयुक्तम् ?

3. ‘नेत्रेण’ इत्यर्थे किम् पदम् गद्यम्शे प्रयुक्तम् ?

4. ‘लोकयात्रा निर्बाधा भवेत्’ - अत्र किम् विशेष्यपदम् ?

**अधोलिखितान् गद्यांशं पठित्वा तदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत –**

नाहम् स्वर्गम् न मोक्षम् वा कामये किन्तु आर्त्तानाम् परित्राणाय एव मे निश्चयः। अस्य याञ्चा वृथा मा अस्तु। इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकम् चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रम् यथास्तानम् अस्थापयत्। ततो महीपालः द्वितीयम् नेत्रमपि शनैः निष्कास्य तस्मै ददौ। अथ विस्मितः शक्रः अचिन्तयत् - **अहो धृतिः ! अहो सत्त्वम् ! अहो सत्त्वहितैषिता !** नायम् चिरम् परिक्लेशम् अनुभवितुम् अर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय इति।

**1. एकपदेन उत्तरत-**

1. कः एकम् चक्षुः उत्पाट्य याचकाय समर्पितवान् ?

2. कः नेत्रम् यथास्थानम् अस्थापयत् ?

**2. पूर्णवाक्येन उत्तरत-**

राज्ञः निश्चयः किमर्थम् आसीत् ?

**3. भाषिककार्यम्-**

1. 'चक्षुषोऽस्य' अस्मिन् पदे सन्धिच्छेदम् कुरुत।

2. 'राजा' पदस्य पर्यायपदम् गद्याम्शात् चित्वा लिखित।

3. 'प्रार्थना' पदस्य समानार्थकम् पदम् गद्याम्शात् चित्वा लिखित।

4. 'नायम् चिरम् परिक्लेशम् अनुभवितुम् अर्हति' इत्यस्मिन् वाक्ये अर्हति क्रियापदस्य किम् कर्तृपदम् ?

**अधोलिखितान् गद्यांशं पठित्वा तदाधारितानाम् प्रश्नानाम् उत्तराणि लिखत –**

अथ स राजा तान् उवाच -

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥**

**1. एकपदेन उत्तरत-**

1. एषः श्लोकः राज्ञा कान् प्रति कथ्यते ?

2. कः मनः अन्यथा कुरुते ?

**2. पूर्णवाक्येन उत्तरत-**

पापी किमर्थम् प्रथिज्ञाम् कृत्वा अपि अन्यथा मनः कुरुते ?

**3. भाषिककार्यम्-**

1. 'योऽन्यथा' अत्र सन्धिच्छेदम् कुरुत।

2. 'ल्यप्' प्रत्ययान्तम् पदम् श्लोकात् विचित्य लिखित।

**अधोलिखितम् गद्याम्शम् पठित्वा प्रश्नान् उत्तरत -**

कतिपयैः दिनैः व्रणविरोपणे जाते एकदा राजा सरोवरस्य समीपे विहरति स्म। तदा तस्य पुरतः पुनः देवराजः शक्रः उपस्थितः भूत्वा तस्य त्यागवृत्तिम् प्रशम्सन् अवदत्-

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**
**वरम् वृणीष्व राजर्षे ! यदिच्छसि तदुच्यताम्॥**

**1. एकपदेन उत्तरत-**

1. शक्रः कस्य त्यागवृत्तिम् प्रशम्सति स्म ?

2. शक्रः केषाम् राजा आसीत् ?

**2. पूर्णवाक्येन उत्तरत-**

शक्रः राज्ञे किम् कथयति ?

**3. भाषिककार्यम्-**

1. 'वृणीष्व' इति क्रियापदस्य कर्तृपदम् किम् अस्ति ?

2. 'राजर्षे!' इति सम्बोधनपदम् कस्मै प्रयुक्तम् ?

**अधोलिखितम् गद्यांशम् पठित्वा प्रश्नान् उत्तरत -**

2 एवम् उक्तेन राज्ञा नेत्रार्थम् प्रार्थिते सति शक्रस्य प्रभावेण आत्मनः सत्यपुण्यबलेन च तस्य प्रथमम् एकम् चक्षुः प्रतिष्ठितम् अभवत् ततः द्वितीयमपि। भूयः प्रीतः शक्रः वरम् अददात्- शतयोजनपर्यन्तम् शैलानाम् पारम् च द्रष्टुम् समर्थः भव इति। इति उक्त्वा शक्रः तत्रैव अन्तर्हितः अभवत्। अतः सत्यमेव उक्तम् -

**धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन ,**

**निधानताम् याति हि दीयमानम्, अदीयमानम् निधनैकनिष्ठम्॥**

**1. एकपदेन उत्तरत-**

1. राज्ञा किमर्थम् शक्रः प्रार्थितः?

2. कस्य प्रभावेण राज्ञः चक्षुः प्रतिष्ठितम् अभवत् ?

**2. पूर्णवाक्येन उत्तरत-**

प्रीतः शक्रः राज्ञे किम् वरम् अयच्छत् ?

**3. भाषिककार्यम्-**

1. 'अदृश्यः' इत्यर्थे किम् पदम् गद्यम्शे प्रयुक्तम् ?

2. 'पुनः' इति पदस्य कृते एकम् अव्ययपदम् गद्यांशे प्रयुक्तम्, तत् किम् ?

3. ______________________________ धनम् हि निधानताम् याति -

रिक्तस्थानपूर्तिम् कुरुत।

4. 'धनस्य निःसारलघोः' अनयोः पदयोः किम् विशेषणपदम् ?

**अधोलिखितस्य श्लोकस्य अन्वये रिक्तस्थनानाम् पूर्तिम् कुरुत-**

**1. दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**

**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥**

**अन्वयः** - दास्यामि इति (i) __________ यः मनः (ii) _________कुरुते कार्पण्य-अनिश्चितमतेः (iii) ___________ (iv) ______________कः स्यात् ।

**2. शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**

**वरम् वृणीष्व राजर्षे ! यदिच्छसि तदुच्यताम्॥**

**अन्वयः** - राजर्षे ! अहम् (i) _____________ शक्रः त्वत् समीपम् (ii) ___________ अस्मि । वरम् (iii) ____________ यत् (iv) ___________ तत् उच्यताम्।

**3. धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन ,**

**निधानताम् याति हि दीयमानम्, अदीयमानम् निधनैकनिष्ठम्॥**

**अन्वयः** - निःसारलघोः (i) __________ सः सारः (ii) ___________ लोहित उन्मुखेन दीयते। (iii) _____________ **(धनम्)** निधानताम् हि याति । (iv) ____________ (धनम्) निधन-एकनिष्ठम् (भवति) ।

**<u>प्रश्ननिर्माणं कुरुत ।</u>**

1.**<u>अभीष्टं</u>** वस्तुजातं प्राप्य याचकाः तुष्टाः आसन् ।

2.राजा पुत्रवत् **<u>प्रजाः</u>** पालयति स्म ।

3.**<u>दानशालासु</u>** विचरन् स राजा अचिन्तयत् ।

4.सः राजा **<u>तान्</u>** उवाच ।

5.**<u>लोके</u>** चक्षुर्दानं दुष्करमेव ।

6.**<u>जनाः</u>** तं देशम् आयान्ति स्म ।

7.**<u>दीयमानम्</u>** हि निधानतां याति ।

8.अहं **<u>भवते</u>** चक्षुर्दानमेव प्रयच्छामि ।

9.**<u>अर्थिनः</u>** धनलाभमात्रेण सन्तोषं भजन्ते ।

10.राजा शिविः **<u>याचकेभ्यः</u>** दानं ददाति स्म ।

**<u>शब्दार्थमेलनं कुरुत ।</u>**

| | | | |
|---|---|---|---|
| 1. | याञ्चा | - | प्रसन्नतया |
| 2. | अमात्याः | - | देहेषु |
| 3. | याचकस्य | - | संसारे |
| 4. | शैलानाम् | - | याचनम् |
| 5. | लोके | - | मन्त्रिणः |
| 6. | प्रीत्या | - | भिक्षुकस्य |
| 7. | गात्रेषु | - | दुःखयुक्तानाम् |
| 8. | आर्त्तानां | - | पर्वतानां |